## F. Third International Yoga Day

The celebrations of Third International Day of Yoga (IDY), in the Rashtriya Sanskrit Vidyapeetha, Tirupati was organized by the Department of Samkhya-Yoga; Yoga, Stress Management and Healing Centre, CoE and National Service Scheme Unit. The celebrations geared up well in advance by arranging competitions of Essay writing, Elocution and Yogasana for the staff and students of Vidyapeetha. The programme was attended by Prof. V. Muralidhara Sharma, Prof. Ch P. Satyanarayana, Prof. Radhakantha Thakur, Dr. C. Ranganathan, Dr. C. Raghavan, Dr. D. Jyothi, Dr. A. Rajendra Reddy, Dr. D. Nallanna, Dr. V. G. Sivasankar Reddy, Deputy Registrar, Dr. Dakshina Murthy, NSS Co-ordinator, other teaching, non-teaching and scores of students. Various events were organized during the day. Transcendental Meditation

# पञ्चचत्वारिंशद्दिनात्मकं योगचिकित्साशिबरम्
## (दिनाङ्कः - ०५.०५.२०१७ तः २१.०६.२०१७)

''शरीरं रोगमन्दिरम्'' इति शास्त्रेषु प्रसिद्धिः वर्तते । अधुना दूषित-वातावरणेन पीडिताः मानवाः विविधैः रोगैः ग्रस्ताः भवन्ति । जीवाणु-भूताणुभिः व्याप्ताः रोगाः कदाचित् औषधैः निराकर्तुं शक्यन्ते ; किन्तु तद्भिन्नाः शिरोवेदना, रक्तचापः, शरीरवेदना, मधुमेह इत्यादयः रोगाः योगमाध्यमेन दूरीकर्तुं शक्यन्ते इति योगविदामभिप्रायः ।



अस्मिन् प्रसङ्गे विद्यापीठस्य योगचिकित्साकेन्द्रपक्षतः पञ्चचत्वारिंशद् दिनात्मकं योगचिकित्साशिबिरं विद्यापीठप्राङ्गणे समायोजितम् । अस्य प्रमुखमुद्देश्यमासीत् ''स्वस्थतिरुपतिः'' । अर्थात् यथा सर्वेऽपि तिरुपतिवासिनः रोगमुक्ताः भवेयुः तदर्थं विविधानां योगासनानां शिक्षणं प्रदत्तम् । विशिष्टतया चतुर्णां दुःसाध्यरोगाणां चिकित्सार्थं योगप्रशिक्षणमिदं सञ्चालितम् । यथा — (१) मधुमेहः :(२) उंच्चरक्तचापः (३) निम्नपृष्ठवेदना (४) स्त्रीसम्बन्धिरोगाश्च ।



कार्यक्रमस्य समुद्घाटनसमारोहे चित्तूरजिल्लापालनाधिकारि-श्रीप्रद्युम्न-महोदयाः मुख्यातिथिरूपेण उपस्थिता आसन् । स्वीयभाषणे इमे वेदकालात् योगाभ्यासप्रक्रिया प्रचलतीति उक्त्वा संस्कृताध्ययनेन योगशास्त्रस्य अध्ययनं सम्यक् कर्तुं शक्यते इति संस्कृतभाषायाः महत्त्वं प्राकटयन् । तिरुमलतिरुपतिदेवस्थानस्य प्रकल्पाधिकारिणः श्री एन्.मुक्तेश्वररावमहोदयाः गौरवातिथिरूपेण समाहूता आसन् । आहार-व्यवहारद्वारा एव स्वास्थ्य-सम्पादनं कर्तुं शक्यते इति ते स्वीयभाषणे प्राबोधयन् ।

''सर्वस्मै विश्वाय योगशास्त्रं भारतप्रदत्तमुपायनम्'' इति कुलपतयः समुदघोषयन् । भारतस्य महनीयता योग-दर्शन-आयुर्वेदाख्येषु त्रिषु शास्त्रेषु सन्निहिताऽस्तीति तैरुक्तम् ।

योगचिकित्साकेन्द्रस्य निदेशकाः डॉ.राजेन्द्ररेड्डीमहोदयाः सम्पूर्णस्य कार्यक्रमस्य संयोजका आसन् । विद्यापीठच्छात्राः, अध्यापकाः, तिरुपति-नागरिकाः विपुलसंख्यया कार्यक्रमेऽस्मिन् भागं गृहीत्वा लाभान्विताः अभूवन् । अत्र १०२ संख्याकाः व्याधिपीडिताः जनाः अचिकित्स्यन्त ।

शिबिरस्यास्य समापनसमारोहः अन्ताराष्ट्रीययोगदिवसपरिपालनावसरे (२१-०६-२०१७) समन्वष्ठीयत । अत्र विद्यापीठस्य अद्वैतवेदान्तविभागस्य आचार्याः प्राक्तनकुलपतयः आचार्य एम्.एल्.एन्.मूर्त्तिमहाभागाः, तथा च दूरशिक्षाकेन्द्रस्य निदेशका आचार्य सिएच्.पि.सत्यनारायणमहोदयाः विशिष्टातिथिरूपेण समाहूयेताम् । प्रसङ्गेऽस्मिन् विद्यापीठप्राङ्गणे प्रतिष्ठापितस्य पतञ्जलिविग्रहस्य पूजाऽपि व्यधायि ।

# अन्ताराष्ट्रिययोगदिवससमारोहः (दिनाङ्कः - २१.०६.२०१७)



समारोहं समुद्घाटयन्तः आचार्य एम्.एल्.एन्.मूर्त्तिसमेताः आचार्य वि.मुरलीधरशर्म-आचार्य सिएच्.पि.सत्यनारायणमहोदयाः



उत्सवे भागग्रहीतृभिः योगकौशलप्रदर्शनम्